# Vinayaka Stuti Sanakadayakrita

# સનકાદયકૃતા વિનાયકસ્તુતિઃ

## Document Information

Text title : Vinayaka Stuti Sanakadayakrita

File name : vinAyakastutiHsanakAdayakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 25 | 2.25 48-58||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# સનકાદયકૃતા વિનાયકસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
સનકાદય ઊચુઃ ।
નમો વિનાયકાયૈવ કશ્યપપ્રિયસૂનવે ।
અદિતેર્જઠરોત્પન્નબ્રહ્મચારિન્નમોઽસ્તુ તે ॥ ૪૮॥
ગણેશાય સદા માયાધાર ચૈતદ્વિવર્જિત ।
ભક્ત્યધીનાય વૈ તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૪૯॥
ત્વં બ્રહ્મ શાશ્વતં દેવ બ્રહ્મણાં પતિરોજસા ।
યોગાયોગાદિભેદેન ક્રીડસે નાત્ર સંશયઃ ॥ ૫૦॥
આદિમધ્યાન્તરૂપસ્ત્વં પ્રકૃતિઃ પુરુષસ્તથા ।
નાદાનાદૌ ચ સૂક્ષ્મસ્ત્વં સ્થૂલરૂપો ભવાન્ પ્રભો ॥ ૫૧॥
સુરાસુરમયઃ સાક્ષાન્નરનાગસ્વરૂપધૃક્ ।
જલસ્થલાદિભેદેન શોભસે ત્વં ગજાનન ॥ ૫૨॥
સર્વેભ્યો વર્જિતસ્ત્વં વૈ માયાહીનસ્વરૂપધૃક્ ।
માયામાયિકરૂપં ત્વાં કો જાનાતિ ગતિં પરામ્ ॥ ૫૩॥
કથં સ્તુમો ગણાધીશં યોગાકારમયં સદા ।
વેદા ન શમ્ભુમુખ્યાશ્ચ શક્તાઃ સ્તોતું કદાચન ॥ ૫૪॥
વયં ધન્યા વયં ધન્યા યેન પ્રત્યક્ષતાં ગતઃ ।
અસ્માકં યોગિનાં ઢુણ્ઢે કુલદેવસ્ત્વમઞ્જસા ॥ ૫૫॥
ઇત્યુક્ત્વા મૌનમાસ્થાય નમામો દણ્ડવત્ સ્મ તમ્ ।
ઉવાચ નો ગણાધીશો ભક્તિભાવનિયન્ત્રિતઃ ॥ ૫૬॥
(ફલશ્રુતિઃ)
વિનાયક ઉવાચ ।
ભવદ્ભિર્યત્કૃતં સ્તોત્રં મદીયં યોગશાન્તિદમ્ ।
ભવિષ્યતિ મહાભાગાઃ પઠતે શ◌ૃણ્વતે સદા ॥ ૫૭॥
યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રભાવિતઃ ।

ભવન્તો ગાણપત્યાશ્ચ ભવિષ્યથ યથા શિવઃ ॥ ૫૮॥

ઇતિ સનકાદયકૃતા વિનાયકસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૨૫ । ૨.૨૫ ૪૮-૫૮॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 25 . 2.25 48-58..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Vinayaka Stuti Sanakadayakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*